**PERIODIC ASSESSMENT-1-ASSIGNMENT**

**SANSKRIT-GRADE-8**

प्र-१- अधोलिखितान् गद्यांशान् पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-

ग्रीष्मकालः सुखदस्य वसन्तकालस्य पश्चात् आगच्छति। ग्रीष्मकाले सूर्यस्य आतपः प्रखरः वर्तते । मानवाः पशु-पक्षिणः वृक्षाः, पादपाः चापि प्रखर-तापेन व्याकुलाः भवन्ति। केचित् जनाः विहाराय पर्वतस्थलेषु गच्छन्ति, केचित् गृहे वातानुकूलितेषु कक्षेषु तिष्ठन्ति । नद्यः, सरोवराः, तडागाः च शुष्यन्ति। सर्वत्र जलस्य अभावः दृश्यते। परं यदि ग्रीष्म-कालस्य प्रचण्डः तापः न स्यात् तर्हि मेघाः कथं भविष्यन्ति। मेघान् विना कुतः वृष्टिः? ग्रीष्मकालस्य प्रभावात् एव वर्षा-ऋतुः आगच्छति। ग्रीष्मकाले गुलमोहर-वृक्षेषु रक्तानि पुष्पाणि अतीव शोभन्ते। मल्लिका-मालती-पादपेषु सुगन्धमयानि श्वेतानि पुष्पाणि विकसन्ति।

I. एकपदेन उत्तरत-(एक पद में उत्तर दीजिए-)

1. ग्रीष्मकालः कस्य कालस्य पश्चात् आगच्छति ?
2. जनाः किमर्थं पर्वतस्थलेषु गच्छन्ति ?
3. ग्रीष्मकाले कस्य अभावः दृश्यते ?
4. ग्रीष्मकाले केषु वृक्षेषु रक्तानि पुष्पाणि आगच्छन्ति ?

उत्तरम्:

1. वसन्तकालस्य
2. विहाराय
3. जलस्य
4. गुलमोहरवृक्षेषु

II. पूर्णवाक्येन उत्तरत-(एक वाक्य में उत्तर दीजिए-)

श्वेतानि पुष्पाणि कुत्र विकसन्ति ?

उत्तरम्-मल्लिका-मालती-पादपेषु सुगन्धमयानि श्वेतानि पुष्पाणि विकसन्ति।

III. यथानिर्देशम् उत्तराणि लिखत-(निर्देशानुसार उत्तर दीजिए)

1. स्यात् = ..................... धातुः, ...................... लकारः, ...................... पुरुषः, ...................... वचनम्
2. विहाराय = ..................... विभक्तिः , ...................... वचनम्।

उत्तरम्:

1. अस्, विधिलिङ, प्रथमः, एक
2. चतुर्थी, एकवचनम्।

IV. 1. समानार्थकम् पदम् चित्वा लिखत- प्रचण्डः = ......................

2. विलोमपदम् लिखत-शैत्यम् = ......................

उत्तरम्ः

1. प्रखरः

2. तापः

2. भारतवर्षः कृषिप्रधान-देशः। अत्र अनेके जनाः ग्रामेषु निवसन्ति। कृषकाः कृषि-कार्यं कुर्वन्ति अन्नानि च उत्पादयन्ति। अन्नं विना कुतः जीवनम्? कृषिकार्यं विना च कथम् अन्नानाम् उत्पादनम् भवेत्? अतः ग्रामाणां कृषकाणां च महत्त्वम्। केचित् ग्रामीणाः स्वे-स्वे गृहे स्थित्वा कार्याणि कुर्वन्ति। यथा लौहकाराः लौहकार्यम् कुर्वन्ति, कुम्भकाराः घयन् रचयन्ति, तक्षकाः काष्ठेन मञ्चकान्, फलकान् आसन्दिकाः च रचयन्ति। अनेकेषु ग्रामेषु विद्युत्-सुविधा न अस्ति। जलानाम् अभावे कृषिः अपि इष्टम् फलं न ददाति। वस्तुतः ग्राम्य-जीवनम् अति कठिनम्। परम् ग्रामीणाः अल्पेन एवं सन्तुष्टाः भवन्ति।

I. एकपदेन उत्तरत–(एक पद में उत्तर दीजिए-)

1. भारतवर्षः कीदृशः देशः ? ।

2. के अन्नानि उत्पादयन्ति ?

3. कः घटान् रचयति ?

4. जलाभावे का इष्ट-फलं न ददाति ?

उत्तरम्ः

1. कृषिप्रधानः

2. कृषकाः

3. कुम्भकारः

4. कृषिः |

II. पूर्णवाक्येन उत्तरत–(पूर्ण वाक्य में उत्तर दीजिए-)

तक्षकाः किं कुर्वन्ति ?

उत्तरम्ः

तक्षकाः काष्ठेन मञ्चकान्, फलकान् आसन्दिकाः च रचयन्ति।

III. निर्देशानुसारं रिक्तस्थानानि पूरयत-(निर्देशानुसार रिक्त स्थान भरिए-)

1. भवेत् = ...................... धातुः, ……………………. लकारः, ……………………. पुरुषः, ……………………. वचनम्।

2. कार्याणि = ...................... विभक्तिः , ……………………. वचनम्

उत्तरम्:

1. भू, विधिलिङ, प्रथमः, एक।

2. द्वितीया, बहु।

IV. 1. अन्नं विना-अत्र विना योगे का विभक्तिः प्रयुक्ता? ......................

2. समानार्थकं पदं चित्वा लिखत-यच्छति = .....................

3. 'जलानाम् अभावे कृषिः अपि इष्टं फलं न ददाति' इति वाक्ये

(क) कर्तृपदम् किम्?।

(i) जलानाम्।

(ii) कृषिः

(iii) इष्टम्।

(ख) कर्मपदम् किम्?।

(i) अपि

(ii) इष्टम्।

(iii) फलम्।

उत्तरम्:

1. द्वितीया

2. ददाति।

3. (क) (ii) कृषि

(ख) (iii) फलम्

3. रामायणम् महाभारतम् च द्वे महाकाव्ये संस्कृत-साहित्यस्य। एतौ ग्रन्थौ भारतीय-संस्कृतेः आधारस्तम्भौ। आदिकाव्यं रामायणम् ऋषेः वाल्मीकेः रचना अस्ति। इदम् काव्यम् अष्टेषु अध्यायेषु वर्तते। ऋषिः वाल्मीकिः आदिकविः कथ्यते । महाभारतस्य रचयिता ऋषिः वेदव्यासः । महाभारतं नाम महाकाव्यम्। विश्व-कोषः इति कथ्यते। 'यत् इह अस्ति न तत् अन्यत्र' इति मन्यते । अयं ग्रन्थः शतसहस्र-श्लोकेषु निबद्धः। विश्व-प्रसिद्ध श्रीमद्भगवद्गीता अस्य महाकाव्यस्य अंशः अस्ति। गीतायाम् श्रीकृष्णः अर्जुनाय उपदिशति-'कर्तव्य-भावेन स्वकर्त्तव्यं कुरु, कर्म-फलस्य आशाम् मा कुरु'। एषः उपदेशः जनानां हितकरः।।

I. एकपदेन उत्तरत।

1. रामायणं कस्य रचना ?

2. ऋषिः वेदव्यासः कस्य रचयिता ?

3. कः आदिकविः कथ्यते ?

4. किं नाम महाकाव्यं विश्वकोषः कथ्यते ?

उत्तरम्:
1. ऋषिवाल्मीके:
2. महाभारतस्य
3. वाल्मीकि:
4. महाभारतम्

II. एकवाक्येन उत्तरत।

श्रीकृष्णः अर्जुनाय किम् उपदिशति ?

उत्तरम्:

श्रीकृष्णः अर्जुनाय उपदिशति-कर्तव्यभावेन स्वकर्तव्यं कुरु, कर्मफलस्य आशा मा कुरु इति।

III. 1. एषः उपदेशः–अत्र किं विशेषणम्?

2. यथानिर्देशम् उत्तरत।

(क) कुरु = ...................... धातुः, ...................... लकारः, ...................... पुरुषः, ...................... वचनम्।

(ख) ऋषेः = ...................... विभक्तिः ...................... वचनम्।

3. बहुवचनम् लिखत-

(क) कुंरु (ए०व०) = ...................... बहुवचनम्।

(ख) स्वकर्तव्यम् (ए०व०) = ...................... बहुवचनम्

4. पर्यायम् लिखत

(क) रचितः ......................

(ख) लेखकः- ......................

उत्तरम्:

1. एषः

2. (क) कृ, लोट्, मध्यमः, एक.

(ख) षष्ठी, एक

3. (क) कुरुत

(ख) स्वकर्तव्याणि

4. (क) निबद्धः

(ख) रचयिता

IV. 'गीतायाम् श्रीकृष्णः अर्जुनाय उपदिशति' इति वाक्ये कर्तृपदम् किम्?

(गीतायाम्, श्रीकृष्णः, अर्जुनाय)

उत्तरम्:श्रीकृष्णः

4-व्याघ्रः अस्मांक राष्ट्र-पशुः। अतीव मनोहरः अयम। अस्य शरीरे पीत- कृष्ण वर्णाः पंक्तयः नितराः शोभन्ते। कदाचित अयं स घनेष वनेषु निर्भयं विहरति स्म। हन्त साम्प्रतम व्याघ्राणां संख्या अत्यल्पा जाता। व्याघ्र जातिं सर्वनाशात रक्षितुं वन-पर्यावरण-मन्त्रालयः अनेकान उपायान करोति; परं सर्वे प्रयत्नाः निष्फलाः भवन्ति। कारणं किम? केषाञ्चित धूर्तानांलोभः अथवा वनानां छेदनम। अस्मांक वन- सम्पतिः रक्षितव्या, देशस्य राष्ट्रपशुः चापि रक्षणीयः।

क- एकपदेन उतरत-

क- अस्माकं राष्ट्रपशुः कः? - व्याघ्रः
ख- व्याघ्रं रक्षितुं कः उपायान करोति? - वन-पर्यावरण-मन्त्रालयः
ग- केषां संख्या अत्यल्पा जाता? - व्याघ्राणाम

ख- विपर्ययम पदानि लिखत-

क- सफलाः - निफलाः
ख- अत्यधिका - अत्यल्पा

## रचनात्मकम कार्यम

**प्र-2 संस्कृत पदानि लिखत-**

क- लोभी - लुब्धः

ख- तिनका - तृणम

ग- कड़वा - कटुकम

घ- मधुमक्खी ळमधुमक्षिका

ङ- पूँछ - पुच्छम

च- कंजूस-कृपणः

**प्र-3-रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत -**

अ-गुणाः गुणज्ञेषु गुणाः भवन्ति। के गुणज्ञेषु गुणाः भवन्ति?

ब-नद्यः सुस्वादुतोयाः भवन्ति। काः सुस्वादुतोयाः भवन्ति?

क-लुब्धस्य यशः नश्यति। कस्य यशः नश्यति?

ख-मधुमक्षिका माधुर्यमेव जनयति। का माधुर्यमेव जनयति?

ग-तस्य मूर्ध्नि तिष्ठन्ति वायसाः । तस्य कुत्र तिष्ठन्ति वायसाः?

घ-क्षुधार्तः सिंहः कुत्रापि आहारं न प्राप्तवान। कीदृशः सिंहः कुत्रापि आहारं न प्राप्तवान?

ड-एषा गुहा स्वामिनः सदा आहवानं करोति। एषा गुहा कस्य सदा आहवानं करोति?

## व्याकरण

**प्र-4 सन्धिं कृत्वा लिखत-**

| | |
|---|---|
| अ- माधुर्यम + एव | मधुर्यमेव |
| ब- नर + अधिपस्य | नराधिपस्य |
| क- महात्मनाम + उक्तिः | महात्मनामुक्तिः |
| ख- स्वम + एव | सर्वमेव |
| ग- खादन + अपि | खादन्ननपि |
| घ- अल्पम + एव | अल्पमेव |
| ङ- समुद्रम + आसाद्य | समुद्रमासाद्य |
| च- दैवम + एव | दैवमेव |
| छ- क्षुधा + आर्तः | क्षुधार्तः |

## साहित्य

**प्र-5 एकपदेन उतरत लिखत-**

| | |
|---|---|
| अ-व्यसनिनः किं नश्यति? | विधाफलम |
| ब-कस्य यशः नश्यति? | लुब्धस्य |
| क-सिंहस्य नाम किम? | खरनखरः |
| ख-गुहायाः स्वामी कः आसीत? | दधिपुच्छः |
| ग-गुहा केन प्रतिध्वनिता? | उच्चगर्जनेन |
| घ-मधुमक्षिका किं जनयति? | माधुर्यम |
| ङ-मधुरसूक्तेसं के सृजन्ति? | सन्तः |
| च-अर्थिनः केभ्यः विमुखा न यान्ति? | महीरुहेभ्यः |

छ-सिंहः कस्मिन समये गुहायाः समीपे आगतः?  सूर्यास्तसमये

ज-हस्तपादादिकाः क्रियाः केषां न प्रवर्तन्ते?  भयसंत्रस्तमनसाम

प्र-6 रेखाङ्तिानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत-

| वाक्यानि | कर्त्ता | क्रिया |
| --- | --- | --- |
| अ-गुणज्ञेषु गुणाः भवन्ति। | गुणाः | भवन्ति |
| ब-नद्यः सुस्वादुतोयाः भवन्ति। | नद्यः | भवन्ति |
| क-मधुमषिका माधुर्य जनयेत। | मधुमक्षिका | जनयेत |
| ख-पिशुनस्य मैत्री यशः नाशयति। | मैत्री | नाशयति |
| ग-सन्तः मधुरसूक्तरसं सृजन्ति। | सन्तः | सृजन्ति |

----------------------------------------